National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 282-284
© 2026 NJHSR
www.sanskritarticle.com

**दुर्गाशङ्करपण्डा**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

.

**Correspondence:**
**दुर्गाशङ्करपण्डा**
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# दूतकाव्यपरम्परायां जीमूतदूतम्

**दुर्गाशङ्करपण्डा**

**१- प्रस्तावना-**

संस्कृतसाहित्ये दूतकाव्यपरम्परायाः विशेषमहत्त्वम् अस्त्येव। अत्र विरहपीडितनायकः स्वप्रियायै सन्देशप्रेषणं दूतमाध्यमेन करोति इति अस्य काव्यप्रकारस्य मुख्यलक्षणम्। कालिदासकृतं मेघदूतम् अस्यां परम्परायाम् आदर्शरूपेण सर्वत्र परिगण्यते। दूतकाव्यं प्रायतः शृङ्गारप्रधानं भवति, परन्तु पण्डितप्रबोधकुमारमिश्रमहोदयस्य मलयदूतं किञ्चित् भिन्नं प्रतिभाति। यतोऽहि इदं काव्यं देशभक्तिपूरकम् अस्ति। मेघदूतकाव्यस्य अनुकरणं कृत्वा कविना डॉकृष्णकेशवषडङ्गिमहोदयेन जीमूतदूतं नाम काव्यं विरचितम् । यद्यपि अस्मिन् काव्ये मेघदूतवत् रचनाविन्यासः, मेघदूतकल्पना, मार्गवर्णनप्रधानता, प्रकृतिचित्रणवैचित्र्यं च दृश्यते, तथापि रामकथामाश्रित्य कविना मौलिकनवोन्मेषः साधितः। अत्र यक्षस्य स्थाने श्रीरामः, यक्षपत्नीस्थाने सीता, अलकानगरीस्थाने लङ्का, सामान्यप्रेमविरहस्य स्थाने धर्मसंवलितः सीताहरणजन्यः रामविरहश्च प्रतिष्ठापितः कविना।

**२- दूतकाव्यस्य स्वरूपं परम्परा च**

संस्कृतसाहित्ये दूतकाव्यस्य मूलतत्त्वं विरहपीडितहृदयस्य कस्यचित् नायकस्य दूतमाध्यमेन आशाव्यञ्जनात्मकसन्देशप्रेषणम् भवति। परन्तु विरहः अत्र केवलं भाववेदना न, अपि तु काव्यगतगाम्भीर्यस्य मूलाधारः। दूतस्य चयनमपि अत्यन्तं सूक्ष्मतया क्रियते। कश्चित् पक्षी, पवनः, चन्द्रः, हंसः, मेघः, अथवा अन्यः प्राकृतिकतत्त्वविशेषः दूततया नियोज्यते। दूतः अत्र सहृदयत्वेन करुणावाहकत्वेन तथा च भावग्रहणसमर्थतया उपस्थाप्यते। अस्मिन् दूतकाव्ये सामान्यतया एकः सुव्यवस्थितः काव्यक्रमः दृश्यते। आदौ एकः विरहपीडितनायकः आगच्छति । ततः सः दूतं प्रति विनयपूर्वकं निवेदनं करोति । अनन्तरं गन्तव्यदेशं प्रति विस्तृतं मार्गवर्णनं क्रियते, यस्मिन् मार्गे स्थितानां पर्वत-वन-नदी-सरोवर-नगरादीनां प्राकृतिसौन्दर्यं चित्र्यते। एतदनन्तरं गन्तव्यस्थाने स्थितायाः प्रियायाः अवस्थायाः वर्णनं भवति। अन्ते नायकस्य सान्त्वनापूर्णः प्रेमगर्भितः आश्वासकरः च सन्देशः दूतमाध्यमेन प्रियायै निवेद्यते। एवमयं क्रमः दूतकाव्यस्य भावात्मकं, संरचनात्मकं, काव्यशास्त्रीयं च सौन्दर्यं परिपुष्णाति।

आलङ्कारिकग्रन्थेषु **"दूतकाव्यम्"** इति पदेन पृथक् विस्तृतपरिभाषा न दृश्यते, तथापि तस्य लक्षणतत्त्वानि विविधैः काव्यशास्त्रविद्भिः प्रतिपादितेषु गीतिकाव्यखण्डकाव्यलक्षणेषु अन्तर्निहितानि सन्ति। साहित्यदर्पणे आचार्यविश्वनाथः खण्डकाव्यस्य परिभाषां दत्तवान्। **"खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च**[1]**"** सा.द. ६/३०७ इति। दूतकाव्यं प्रायः महाकाव्यवत् व्यापकं न भवति, किन्तु कस्यचित् एकस्य भावविशेषस्य विशेषतः विरहस्य आश्रयेण विकसितं भवति । अतः तत् खण्डकाव्यान्तर्गतमिति परिगण्यते।

**३- जीमूतदूतस्य कथावस्तु एवं रचनाविन्यासः**

जीमूतदूतम् रामकथामूलकं दूतकाव्यम् अस्ति। अस्मिन् श्रीरामः सीताहरणोत्तरकाले विरहदुःखेन संतप्तः सन् जीमूतं प्रति सन्देशवाहकत्वेन प्रार्थनां करोति।

जीमूतः अर्थात् मेघः । अमरकोशे यथा –

**धराधरोजलधरस्तडित्वान्वारिदोऽम्बुभृत् ।**

**घनजीमूतमुदिरजलमुग्धूमयोनयः[2] ॥**

श्लोकेऽस्मिन् रामः जीमूतस्य गुणकीर्तनं करोति –

**जीमूत ! त्वं निखिलजनताभङ्गमाङ्गल्यहेतुः**
**सोष्मग्रीष्मप्रहरणपटुर्भूमिसम्मोददायी।**
**भूमेः कन्या मम सहचरी दैवतः**
**पारमब्धेः सीता नीता दनुजपतिना हा !! विडम्बप्रकारः[3] ॥**

वनवासकाले सीतायाः अपहरणात् परं भगवान् श्रीरामः लक्ष्मणेन सह महतीं व्यथामनुभवन्, तस्याः अन्वेषणाय वनान्तरेषु पर्वतप्रदेशेषु च विचरति। तस्य सीताविरहदग्धं हृदयं सर्वदा तस्याः अन्वेषणे निमग्नमासीत्। सः स्वस्य भ्रमणयात्राकाले माल्यवान्पर्वतशिखरे विहरन् आकाशे सञ्चरन्तं मेघमपश्यत्। तदा सः गच्छन्तं नीलमेघं सम्बोध्य रावणराज्ये दुःखार्तया निवसन्त्यै स्वप्रियायै सीतायै स्वान्तर्निहितभावानां सन्देशं नेतुम् अयाचत। माल्यवान्पर्वतस्य शिखरे संलग्नाः नीलमेघखण्डाः दूतरूपेण दक्षिणदिशं प्रति आकाशमार्गेण गच्छन्तः गोदावरीं, कृष्णां, मलयगिरिं, अगस्त्यमुनेः आश्रमं, कावेरीनदीम्, ऐतिहासिकीं ताम्रपर्णीनदीं, पाण्ड्यदेशं, महेन्द्रपर्वतं, महान्तं भारतमहासागरं, मैनाकपर्वतं, तथा त्रिकूटशैलकूटञ्च अतिक्रम्य अन्ते रावणस्य राजधानीं लङ्कां प्राप्नुवन्ति। अत्र दूतस्य मार्गवर्णनं वाल्मीकीरामायणानुसारमेव विन्यस्तम्। रावणस्य सुवर्णदुर्गे बन्दीभूता सीता स्वप्रियतमात् श्रीरामात् सन्देशप्राप्त्याशया प्रतिक्षणमश्रूणि सिञ्चन्ती शोकमग्ना तिष्ठति। अनन्तरं लङ्कावर्णनं, राक्षसराजधानीवैभवचित्रणम्, अशोकवने सीतायाः दीनावस्था, तस्याः विरहवेदना, तथा रामस्य तां प्रति सन्देशः विस्तरेण प्रतिपादितः। अस्मादेव ज्ञायते यत् जीमूतदूतम् दूतकाव्यस्य परम्परागतसंरचनाम् अनुसरति ।

**४- <u>जीमूतदूते मेघदूतस्य प्रभावः-</u>**

बहुषु स्तरेषु स्पष्टतया परिलक्ष्यते। प्रप्रथमम् उभयत्र मेघ एव दूतत्वेन प्रतिष्ठितः। कालिदासस्य यक्षः यथा मेघं स्वप्रियायाः समीपं प्रेषयति तथैव अत्र श्रीरामः जीमूतं सीतायाः समीपं प्रेषयति। मेघस्य चयनं काव्यदृष्ट्या अत्यन्तं सार्थकं, यतो हि मेघः उच्चगामी, वृष्टिदाता, लोकहितकारी, शीतलस्वभावः, तथा सर्वदेशगामी च भवति। एते गुणाः दूतस्य अनुकूलतां वहन्ति। अन्यच्च उभयत्र विरहनायकः स्वहृदयव्यथां दूतस्य पुरतः निवेदयति। दूतः अत्र निःस्पन्दवस्तुः न, अपि तु सहानुभूतिसमर्थः विनीतः तथा भावग्राही इव चित्रितः। तृतीयं मार्गवर्णनप्रधानः पूर्वभागः, प्रियायाः अवस्थावर्णनयुक्तः सन्देशप्रधानोत्तरभागश्च एषः रचनाविन्यासः मेघदूतस्य स्मरणं जनयति। चतुर्थं, प्रकृतिचित्रणं उभयत्र केवलं सौन्दर्यवर्णनरूपेण न, अपि तु भावव्यञ्जनायाः प्रधानसाधनरूपेण व्यवहृतम्।

पञ्चमं दूतस्य मार्गे ये प्रदेशाः दृश्यन्ते ते कविमनसः कल्पनासौन्दर्यस्य क्षेत्रं भवन्ति। यथा मेघदूते विन्ध्यादयः, नदी नगराणि, अलकापुरीपर्यन्तं मार्गः भावमयतया चित्रितः, तथैव जीमूतदूते दक्षिणभारतीयभूभागः, मलयाचलः, कावेरी, ताम्रपर्णी, महेन्द्रगिरिः, समुद्रः, लङ्का च सजीवत्वेन चित्रितः। अनेन जीमूतदूतम् दूतकाव्यपरम्परायाः संरचनात्मकसातत्यं प्रदर्शयति।

**५- <u>प्रकृतिचित्रणं लङ्कावर्णनं च-</u>**

जीमूतदूते प्रकृतिचित्रणं अत्यन्तं समृद्धं, सजीवं दृश्यते। अस्मिन् काव्ये प्रकृतिः न केवलं द्रष्टव्यसौन्दर्यस्य विषयः अपि तु नायकस्य सहानुभूतिसखी इव व्यवह्रियते। पर्वताः मेघस्य आलिङ्गनं कुर्वन्ति, नद्यः तस्य स्वागतं कुर्वन्ति, मयूराः नृत्येन हर्षं व्यक्तयन्ति, शीतलमरुतः दूतस्य पथं सुखकरं करोति, वर्षाधाराः लोकक्लेशं निवारयन्ति। एतेन मेघः लोकहितकारी, दयालुः, जीवनदः, तथा करुणासंवाहकः इति स्पष्टं भवति। मेघस्य करुणाभावमत्र कविः वर्णयति ।

**जीमूत ! त्वं निखिलजनताभङ्गमाङ्गल्यहेतुः**
**सोष्मग्रीष्मप्रहरणपटुर्भूमिसम्मोददायी ।**
**भूमेः कन्या मम सहचरी दैवतः पारमब्धेः**
**सीता नीता दनुजपतिना हा !! विडम्बप्रकारः[4] ॥**

दक्षिणमार्गवर्णने कविना भौगोलिकविस्तारः काव्यरूपेण सुन्दरतया संयोजितः। मलयपवनः, चन्दनवनानि, कावेरीतटाः, ताम्रपर्णी, महेन्द्रगिरिः, सिन्धुतीरम्, त्रिकूटशैलः इत्यादिनि स्थलनि न केवलं पथचिह्नानि, अपि तु रसप्रवाहस्य सोपानानि भवन्ति। यथा शम्भोः गले सर्पः कुटिला माला इव तिष्ठति तथैव गोदावरी पर्वतगात्रं परिवेष्ट्य स्थितवती अस्ति, इति वर्णयित्वा कविः लिखति यत् -

**गोदा मोदाकुलजलकुलालोलवन्याविनोदा**
**द्रष्टव्या ते तदनु जलमुग् ! वन्धुरे शैलतल्पे ।**
**भव्या भूव्यायतलहरिभिश्चञ्चलं सञ्चरन्ती**
**व्यालीयालंकृतिरिव लसल्लिङ्गदेहस्य शम्भोः ॥**

अत्र प्रकृतिचित्रणं रामस्य विरहभावस्य विस्तारकं, मेघस्य गमनस्य सजीवचित्रणं तथा पाठकस्य भावानुभवस्य संवर्धकं च अस्ति। लङ्कावर्णनं तु अस्य काव्यस्य अन्यतमं आकर्षणम्। सुवर्णमयी, रत्नखचितप्रासादसमृद्धा, दानवबलयुक्ता, सौन्दर्यशालिनी, दिव्यवैभवोपेता लङ्का वर्ण्यते। तद्यथा -

**झञ्झावातध्वनितसुभगं निष्कुटं झावुकाना-**
**मेतस्याद्रेर्विपुलकटके माविलम्बं क्रमित्वा ।**
**लङ्कां पश्येरिव दशशिरः कीर्त्तिसद्वर्णखानिं**
**तुल्याभावात् कनककटकं वाऽप्यभुक्तं धरण्या[5] ॥**

अपि च -

**स्वर्णच्छायाविलसिततनुः साऽतुला शोणरत्न-**
**ज्योतिः स्नाताधरकिसलया चन्द्रकान्तोज्वलास्या।**
**मुक्तामालाभरणरुचिरा दक्षिणावर्त्तकम्बु-**
**भ्राजत्कण्ठा मणिगणरुचा रञ्जयन्ती दिगन्तान्[6]॥**

किन्तु एतत् वैभवं धर्ममूलकं न, अपि तु रावणस्य अहङ्कारस्य भोगस्य दुराचारस्य तथा च अधर्मेण प्रष्ठितराज्यस्य आच्छादनमिव दृश्यते। अत्र कविः अद्भुतं विरोधाभासं निर्माति यत् बाह्यरूपेण दिव्यं, परन्तु अस्य अन्तः एव दूषितम्। अत्र मेघदूतस्य अलकावर्णनात् जीमूतदूतस्य लङ्कावर्णनं भिन्नमेव प्रतीयते।

**६- सीतायाः अवस्थावर्णनम्**

जीमूतदूतस्य सर्वाधिकमार्मिकः अंशः अशोकवने सीतायाः अवस्थावर्णनम् इति वक्तुं शक्यते। अत्र सा अश्रुपूर्णलोचना, कृशाङ्गी, विरहेण दग्धहृदया, भूमौ रेखाः अङ्कयन्ती, धूलिषु रामस्य आकृतिं लिखन्ती, कालगणनां कुर्वती इति चित्रिता। सीता भूमौ रामस्य विषये चिन्तयन्ती तस्य चित्रं निर्माति । तदुक्तं कविना -

**द्रष्टव्याऽत्र प्रबलरुदितस्फीतसंरक्तनेत्रा**
**वारं वारं विगलितहृदा भूमिपृष्ठे लुठन्ती।**
**याचन्ती वा मम विरहजालेख्यमालिख्य धूलौ**
**वीराश्लेषान् वितर वितरेत्येव पाणी प्रसार्य[7] ॥**

एतादृशं चित्रणं न केवलं बाह्यदैन्यस्य, अपि तु अन्तर्मनसः सूक्ष्मव्यथायाः दिग्दर्शनं करोति। तस्याः केशा अव्यवस्थिताः, मुखं पाण्डुरं, नेत्रे अश्रुविण्डवः देहः शोकतापेन कृशः आसीत् । तद्यथा -

**निःश्वासानां घनघनपरित्यागनीरागवक्त्रा**
**यत्नाभावाललितचिकुरा पृष्ठनिष्पन्दवेणी ।**
**दध्यान्नेत्रेऽविरलविगलद्बाष्पपर्याकुलाभे**
**शङ्के पङ्केरुह इव भवदृष्टिसम्पातनष्टे[8] ।।**

एवं तस्याः दारुणस्थितिः कविना करुणया परिपूर्णया दृष्ट्या उपस्थापिता। मृगशिशुं दृष्ट्वा **"नाथ! नाथ!"** इति तस्याः क्रन्दनम्, रात्रौ निःशब्दतया भूमिं निरीक्ष्य समययापनं, विरहदग्धचित्तया रेखाङ्कनं च एते सर्वे प्रसङ्गाः सीतायाः मानसिकदशायाः सूक्ष्मं निरूपणं कुर्वन्ति। अत्र सीता केवलं विलपन्ती नायिका न, अपि तु धैर्यधारिणी, आशालम्बिनी, रामस्मृतिपोषिता तथा पतिव्रताधर्मे अचलस्थिता च। अतः तस्याः विरहः करुणः सन् अपि गौरवशाली भवति। एषा मर्यादा एव अस्य काव्यस्य माधुर्यं वर्धयति।

**७- रसवैशिष्ट्यम् : करुणविप्रलम्भश्रृङ्गारयोः समन्वयः**

अस्य काव्यस्य प्रधानः रसः करुणः इति नूनमेव वक्तुं शक्यते। रामस्य सीताविरहः, आत्मविलापः, दैन्यं, सीतायाः दुःखादिकम् एतेषां समन्वयेन करुणरसः उत्कर्षमधिगच्छति। अत्र स्थायीभावः शोकः, विभावव्यभिचारिसंयोगेन, पाठकहृदये गाढसंवेदनां जनयति। तथापि अस्य करुणस्य मूलाधारः विप्रलम्भश्रृङ्गार एव। रामस्य सीतास्मरणे तस्याः मुखस्य, नेत्रयोः, वाण्याः, गमनस्य, हासस्य, कोमलस्वभावस्य च वर्णनं स्पष्टतया विप्रलम्भश्रृङ्गारस्य परिपुष्टिं जनयति।

**८- उपसंहारः-**

अत्र निश्चयेन वक्तुं शक्यते यत् जीमूतदूतम् दूतकाव्यपरम्परायां महत्त्वपूर्णं स्थानं धारयति। यद्यपि अस्य काव्यस्य रचनायां मेघदूतस्य प्रभावः स्पष्टतया दृश्यते तथापि एतत् काव्यं केवलं अनुकरणकाव्यं नास्ति। रामकथामूलकविषयनिर्वाचनात्, श्रीरामस्य धर्मसंबलित-विरहात्,सीतायाः करुणगौरवयुक्तावस्थाचित्रणात्,लङ्कायाः वैभवा-धर्मविरोधाभासात्मकनिरूपणात्, तथा सन्देशे आशाधैर्यप्रतिज्ञा-भक्तिभावानां समुचितसंयोजनात् जीमूतदूतस्य स्वातन्त्र्यं सुदृढं प्रतिष्ठितम्। अतः जीमूतदूतमं मेघदूतस्य प्रभावक्षेत्रे स्थितमपि, रामकथा- उन्मेषेण करुणरसगौरवेण तथा च मौलिककल्पनया समन्वितं दूतकाव्यपरम्परायाः एकं विशिष्टं, रससमृद्धम्, अध्ययन-योग्यं च काव्यमिति प्रतिपादयितुं शक्यते।

**संदर्भग्रन्थसूची –**


१. जीमूतदूतम् – डॉकृष्णकेशवषडङ्गिः-
२.साहित्यदर्पणः-विश्वनाथकविराजः-चौखम्बाविद्याभवनवाराणसी१
३. मेघदूतम् - कालिदासः- कृष्णदास अकादमी, वाराणसी
४- अमरकोशः - चौखम्बा ओरियन्टालिया


**सङ्केताक्षरसूची-**

१. सा.द. - साहित्यदर्पणः
२. अ.को. - अमरकोशः
३. जी.दू. - जीमूतदूतम्

**सन्दर्भ-सूची**

[1] सा.द. ६/३०७
[2] अ.को.- १/३/७/७/२
[3] जी. दू १.१०
[4] जी.दू.-१.१०
[5] जी.दू. १.१
[6] जी.दू. १.३
[7] जी.दू-२.१७
[8] -जी.दू-२.१८